# RAMSADAY COLLEGE

## Department of Sanskrit

Semester : VI (General)

Paper : DSE-3

Topic : Kāvyaprakaśa

(Section-B)

Ramsaday College

Prepared by : Paramita Banik

# *Kāvyaprakaśa*

## SANG *DSE-3*

## Section-B

## Objective Type Question-Answers

1. काव्यप्रकाशः - इत्यस्य रचयिता कः ? काव्यप्रकाशे कति उल्लासाः सन्ति ?

उत्तरम् : काव्यप्रकाशः - इत्यस्य रचयिता आसीत् **मम्मटाचार्यः**।

काव्यप्रकाशे **दश** उल्लासाः सन्ति।

2. शक्तिः __________ __________। - मम्मटवृत्तिदिशा रिक्तस्थानद्वयं पूरयितव्यम्।

उत्तरम् : शक्तिः **कवित्वबीजरूपः** **संस्कारविशेषः**।

3. काव्यप्रकाशे निपुणता इति -

(a) कविगुणः (b) काव्यप्रयोजनम् (c) काव्यस्वरूपम् (d) काव्यकारणम्

-- यथार्थमुत्तरं चेयम्।

उत्तरम् : **काव्यकारणम्** ।

4. मम्मटमते शक्तिः का ?

उत्तरम् : काव्यप्रकाशः इति ग्रन्थस्य वृत्तौ आचार्येण मम्मटेनोक्तम् - **शक्तिः हि कवित्वबीजरूपसंस्कारविशेषः**। शक्तिं विना काव्यं न प्रसरेत् (रचयेत्) रचितं वा तदुपहसनीयं भवेत् , न तु उत्कृष्टकाव्यम्।

5. 'निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्' - कविना केषु शास्त्रेषु नैपुण्यम् अर्जितव्यम् ?

उत्तरम् : कविना छन्दो-व्याकरणाभिधानकोशशास्त्रेषु तथा चतुःषष्टि-कलासु

Ramsadaj College

धर्मार्थकाममोक्षसमन्वितेषु शास्त्रेषु , हस्त्यश्वादिविषयकविद्यासु शस्त्रादिलक्षणग्रन्थेषु च नैपुण्यम् अर्जितव्यम्

**6. 'काव्यज्ञशिक्षयाभ्यासः' - कस्तावत् काव्यज्ञः ?**

उत्तरम् : काव्यं रचयितुं तथा विचारयितुं यः जानाति, स काव्यज्ञः।

**7. 'काव्यज्ञशिक्षयाभ्यासः' - तात्पर्यं किम् ?**

उत्तरम् : काव्यं रचयितुं विचारयितुं च ये जानन्ति, ते खलु काव्यज्ञाः। तेषां समीपे काव्यरचनं काव्यविश्लेषणं चापि शिक्षणीयम्।अनया शिक्षया च पुनः पुनः काव्यविरचनप्रयासः हि अभ्यासः इति मम्मटभावः।

**8. मम्मटमते काव्यस्य कारणं किम् ?**

**Or, मम्मटमते काव्यकरणं कतिविधम् ?**

उत्तरम् : मम्मटमते **शक्तिः , निपुणता व्युत्पत्तिर्वा अभ्यासश्चेति त्रयं** सम्मिलिततया काव्यहेतुरूपेण परिगणितम्। अर्थात् एतानि काव्यकारणानि दण्डचक्रादिन्यायेन परस्परसापेक्षाणि।

**9. "शास्त्राणां छन्दो-व्याकरणाभिधानकोशकलाचतुर्वर्ग......." —**

**(i) छन्दःशास्त्रेषु कस्यापि एकस्य उल्लेखः कार्यः।**

**(ii) कस्यचिद् एकस्य व्याकरणग्रन्थस्य कोशशास्त्रस्य च नाम लिख्यताम्।**

**(iii) चतुर्वर्ग-शब्देन किमवबुध्यते ?**

उत्तरम् : (i) छन्दःशास्त्रेषु अन्यतमं हि **पिङ्गलाचार्यप्रणीतं पिङ्गलछन्दःसूत्रम्**।

(ii) एकस्य व्याकरणग्रन्थस्य कोशशास्त्रस्य च नाम यथाक्रमेण -

**महामुनिपाणिनेः अष्टाध्यायी अमरसिंहकृतः अमरकोशः** चेति।

(iii) चतुर्वर्गाः हि **धर्मार्थकाममोक्षाः**।

Ramsaday College